वर्षम् - ०२ अङ्कः - ०२ शोधज्योतिः
जनवरी-दिसम्बर, २०२० ISSN-2350-0700

# ओङ्कारस्य स्थानप्रयत्नविचारः

**भट्ट कर्मेशः**[१]

ओङ्कार इति एकं संयुक्ताक्षरम् , न तु पृथगक्षरत्वेन परिगणितुं शक्यते। अकारः, उकारः, मकार इति वर्णाः संयुज्य अयं शब्दः निष्पद्यते। एवं च अकारादीनां स्थानं परीक्षयामः।

## अथ सिद्धान्तकौमुद्यनुसारं स्थानानि -

**अकारः-** अत्र अकारस्य कण्ठ-स्थानमिति उक्तमस्ति। कण्ठः स भवति यत्र वायोरभिघातः प्रथमतया भवति। तस्य उपयोगेन अकारादयः वर्णाः उच्चार्यन्ते (अकुहविसर्जनीयानां कण्ठः)। यद्यपि कण्ठ इति स्थानं सर्वेषां वर्णानां समानम्। यतो हि तस्य साहाय्यं विना न कश्चित् वर्णः उच्चारयितुं शक्यते। किन्तु कण्ठस्थानवर्णान् अतिरिच्य अन्येषाम् इकारादीनाम् उच्चारणे तावत् ताल्वादीन्यपि सहकुर्वन्ति। ततश्च कण्ठः सामान्यं स्थानमिति न परिगण्यते सर्वत्र।

अकारस्तावत् कण्ठं विना न किञ्चित् स्थानान्तरम् अपेक्षते। शिक्षायामं कवर्गस्य उच्चारणं जिह्वामूले भवति इति उक्तमस्ति "**कण्ठ्यावहौ जिह्वामूले तु कुः प्रोक्तः**" इति श्लोके। तर्हि व्याकरणस्य शिक्षाविरोधः खलु इति प्रश्नः। तत्र परिहारार्थं प्रयत्नः कृतः आचार्यनागेशेन स्वग्रन्थे लघुशब्देन्दुशेखरे। स वदति अत्र कण्ठपदं न केवलं कण्ठस्थानपरम्। किन्तु कण्ठस्थानेन सह जिह्वामूलमपि वदति। अतः शिक्षावचनेन न विरोधः इति।

**अकुहविसर्जनीयानां कण्ठः ।**
**इचुयशानां तालु ।**
**ऋटुरषाणां मूर्धा ।**
**लृतुलसानां दन्ताः ।**

---

[१] प्राध्यापकः, वेदविज्ञानगुरुकुलम्, बेङ्गलूरु

**उपूपध्मानीयाम् ओष्ठौ ।**
**ञमङणनानां नासिका च ।**
**एदैतोः कण्ठतालु ।**
**ओदौतोः कण्ठौष्ठम् ।**
**वकारस्य दन्तौष्ठम् ।**
**जिह्वामूलीयस्य जिह्वामूलम् ।**
**नासिकानुस्वारस्य ।**

संयुक्ताक्षराणां तावत् स्थानानि कण्ठतालु, कण्ठौष्ठम् इति उक्तम्। तदेकं पृथक्स्थानमिति भ्रमः न भवेत्। कण्ठश्च तालु च कण्ठतालु इति द्वन्द्वः। उभयोः समकार्यित्वं समासतः बुद्ध्यते। अतः इदं पृथक्स्थानं न, अपि तु उभयोः स्थानित्वेन ते वर्णाः उच्चार्यन्ते इति अर्थः। तयोः अन्तरालम् इत्यपि न चिन्तनीयम्। किन्तु कण्ठः अपि स्थानं तालु च। अकारादिषु तु कण्ठे एव वाय्वभिघातः भवति इति तदेकमेव स्थानत्वेन व्यपदिश्यते।

आस्यमित्युक्तौ ओष्ठात् प्रभृति प्राक्काकलकम्। आस्यं नाम मुखम्। तत्र भवम् इत्यर्थे यति अपि समानं रूपम्। तेन च पदेन स्थानानि एव गृह्यन्ते, **तुल्यास्यप्रयत्नम्** इति सूत्रे प्रयत्नशब्दस्य पृथक्पाठात्। प्रयत्नाः अपि मुखे भवाः एव, तथापि प्रयत्नशब्दस्य पृथग्ग्रहणात् तेषाम् आस्यत्वं प्रकृतसूत्रे न विवक्ष्यते।

ननु नासिका आस्याद् बहिर्भूता, तत्कथं स्थानत्वेन सा परिगण्यते। अतः करणमिति स्वीकुर्मः। ततश्च ककारस्य ङकारेण सह सावर्ण्यं सिद्ध्यति। अन्यथा नासिकापि स्थानमेव इति कृत्वा साम्याभावात् सावर्ण्यं बाध्येत। किं च अत्र शास्त्रे यावत्स्थानसाम्यमेव सिद्धान्तितम्। अतः कण्ठमात्रसाम्येन ककारङकारौ सवर्णौ इति वक्तुं न शक्यते। अतः हेतोः नासिका स्थानं न, अपि तु करणमेव इति शिक्षाविदः।

वस्तुतस्तु नासिका स्थानमेव। तथा हि भाष्यम् "अस्यन्ति अनेन वर्णान्"[१] इति आस्यम् इति व्युत्पत्तिः प्रदर्शिता। तच्च ताल्वादिष्विव नासिकायामपि अन्वेति। स्थानं नाम तद् भवति वर्णस्य आधारः यः। वर्णानाम् अभिव्यक्तौ जनकत्वेन विद्यमाने भागे वर्णस्य उत्पत्त्यनुकूलतया जायमानः वायुसंयोगः वर्णस्य स्फुटताम् आसादयति। तस्य यः आधारः स वर्णाधारः इति आरोप्य स्थानत्वेन व्यपदिश्यते।

---

[१] महाभाष्यम्-सू.सं - १/१/८

ततश्च करणेषु अपि नासिकादिषु वायुसंयोगाधारत्वेन स्थानत्वव्यवहारः। यानि एतावता स्थानत्वेन अभिमतानि तेषु जिह्वाग्रमध्यमूलानां स्पर्शः यः भवति सः प्रयत्नः इति अभिधीयते। स च सम्बन्धः स्पृष्टतादिरूपेण विभक्तः पृथक् पृथक् भवति वर्णानाम्। अतः स्थानप्रयत्नयोः साङ्कर्यं नास्ति।

उदात्तादीनां गुणत्वव्यवहारस्तु सावर्ण्यानुपयोगित्वेन आन्तरतम्यपरीक्षानुपयोगित्वेन च सारूप्यम् आदाय। अनुस्वारापेक्षया ङादीनां वैलक्षण्यात् तत्र ङादिषु नासिकापि स्थानमेव।

अकारस्य अष्टादश भेदाः सन्ति। तेषु सर्वेऽपि विवृतप्रयत्नवन्तः प्रयोगदशायाम्। ह्रस्वः अकारः प्रक्रियायां संवृतः इति पाणिनिः वदति "अ अ"[१] सूत्रेण। किञ्च अकार अच् (स्वरः)। अतः एतस्य आभ्यन्तरप्रयत्नाः अपि सन्ति। बाह्यप्रयत्नाः केचन एव सन्ति।

## उपूपध्मानीयानाम् ओष्ठौ ।

ओष्ठौ इति स्थानेन उकारः, पवर्गः, उपध्मानीयश्च उच्चार्यन्ते। तयोरेव ओष्ठयोः परस्परं स्पर्शेण एते वर्णाः निष्पद्यन्ते। कण्ठतः वायुस्तु निस्सरेदेव। ओष्ठयोः संयोगविभागाभ्यां सः वायुः वर्णरूपताम् आप्नोति। यथा वंशस्य शिशिरेषु गच्छन् वायुः ध्वनिम् उत्पादयति सुस्वरम्। यद्यपि ओष्ठौ इति सप्तानाम् एषां समानं स्थानं निर्दिष्टम्। तथापि न एकधा एव संयोगः तत्र लक्ष्यते। उकारोच्चारणकाले ओष्ठयोः अग्रभागः विभक्तः, मध्यभागः संयुक्तः भवति। पवर्गस्य उच्चारणे तावत् सम्पूर्णतया ओष्ठौ संयुज्येते। उपध्मानीयस्य उच्चारणं तयोः स्थूलस्पर्शतः सिद्ध्यति। अयमेव प्रयत्नशब्देन उच्यते।

मकारस्य अपि ओष्ठौ एव स्थानम्। अतः न पुनः विचारणीयम् अस्ति। किन्तु अयमेकः अनुनासिकः वर्णः। ओष्ठाभ्यां सह नासिका अपि मकारोच्चारणे सहकारिणी।

"मुखनासिकावचनोऽनुनासिकः"[२] इति सूत्रस्य भाष्ये मुखनासिकावचनशब्दस्य विचारणायामेवं विग्रहः चिन्तितः। मुखोपसंहिता नासिका मुखनासिका। सा वचनं यस्य इति। तथा हि सूत्रे नासिका इति दीर्घः न दोषः। अनुनानासिकस्य पूर्वः परो वा भागः नासिकया उच्चार्यते, अपरः मुखेन। तत्र नासिकावचनभागस्य अनुरागवशात् मुखभागोऽपि नासिकावचनः इव लक्ष्यते। यथा- सय्यँन्ता इत्यत्र यद्यपि यकारः एव अनुनासिकः, किन्तु तद्रागात् अकारोऽपि तथैव भासते। अन्ये केचन मुखनासिका इति स्थानं मुखनासिकाभ्यां भिन्नमेव इति वदन्ति। तयोरन्तराले भवं स्थानं तत्। तत्र उच्चारितः

[१] पा.सू - ८/४/६८

[२] पा.सू - १/१/८ पृष्ठसङ्ख्या -२३६

अनुनासिकसंज्ञः भविष्यति इति कैय्यटेन व्याख्यातम्। एतेन मुखं स्थानम्, नासिका करणम् इति वादः प्रत्युक्तः। उभौ मिलित्वा स्थानत्वव्यपदेशं लभते इत्येव ज्ञेयम्।

मकारः स्पर्शेषु वर्णेषु अन्तर्भवति। अतः अस्य आभ्यन्तरप्रयत्नः भवति स्पृष्टप्रयत्नः।

मकारस्य बाह्यप्रयत्नाः इमे -

संवारः

नादः

घोषः

अल्पप्राणः

उदात्तादयः स्वराः अचः एव सम्भवन्ति। न तु हलाम्। अतः न अन्येषां प्रयत्नानां सम्भवः मकारविषये।

पुनश्च स्वराणां विषये मात्राः इति सन्ति। प्रत्येकम् अचः ह्रस्वदीर्घप्लुत इत्येवंरूपेण तिस्रः मात्राः सम्भवन्ति। ओङ्कारे तावत् अकारः उकारः इत्यनयोः वर्णयोः इमाः वर्तन्ते। सामान्यतः अस्य उच्चारणे अकारोकारयोः ह्रस्वयोः संयोगेन दीर्घः ओकारः लभ्यते। मकारस्तु अर्धमात्रिकः। ततश्च अयं वर्णः अर्धतृतीयमात्रः इति स्थितम्।

## सन्ध्यक्षराणि

अक्षराणां बहुधा सन्धयः भवन्ति। तेषां सन्धीनाम् उल्लेखः अष्टाध्याय्यां वर्तते। यण्-सन्धिः, गुणसन्धिः, वृद्धिसन्धिः इत्यादि। ते च संहितायाम् इत्यधिकारे सन्ति। संहितायाश्च व्यवस्था इत्थं वर्तते-

**संहितैकपदे नित्या नित्या धातूपसर्गयोः।**
**नित्या समासे वाक्ये तु सा विवक्षामपक्षते ॥**

**अर्थः** - वर्णयोः मध्ये यदि सन्धिकार्यं कर्तुं योग्यता अस्ति तर्हि एकस्मिन् पदे अवश्यं कर्तव्यम्। धातुस्थेन वर्णेन उपसर्गगतवर्णस्य सन्धिकार्यमपि क्रियते चेदेव प्रयोगे सः साधु इति परिगण्यते। समासे पदद्वयं भवति, तथापि तत्र संहिता नित्या एव। यत्र एतत्त्रितयं नास्ति तादृशे वाक्ये सः सन्धिः वक्तुरिच्छानुसारं भवति न भवति च।

## उदाहरणानि -

एकपदम् - राम+इन =रामेण

धातूपसर्गौ - प्र+इष्यते= प्रेष्यते

समासः - राजा+आज्ञा = राजाज्ञा

वाक्यम् - तव+एव= तवैव / तव एव

एवं सन्धयः वर्णानां सन्ति। केचन वर्णाः अपि संयुक्तवर्णाः इति व्यवह्रियन्ते। तत्रापि विभागद्वयम्। कृत्रिमसंयोगः, अकृत्रिमसंयोगः। तत्रादौ यथा ककारषकारयोः संयोगेन “क्ष” इति एकम् अक्षरम् उपलभ्यते। अयं कृत्वा सन्धिकार्यं निष्पन्नः। एकारः, ओकारः, ऐकारः, औकारः इत्येते तु स्वभावतः संयुक्ताक्षराः एव। यद्यपि अकार+इकार इत्यनयोः सन्धिना एकः एकारः लभ्यते। किन्तु सः माहेश्वरसूत्रस्थात् भिन्नः एव। यदि तु स एव स्यात् तर्हि तयोः वर्णयोः क्वचिदपि स्थितयोः संयोगे स एव लभ्येत। न तु लभ्यनते, इ+अ इत्यवस्थायां तु यणा य इति अक्षरं लभ्यन्ते। इत्थं च माहेश्वरसूत्रेषु पठितः भिन्नः एव। तत्र इतोऽपि एकं कारणम् अस्ति। यदि तु सन्ध्यक्षरमेव स्यात् तर्हि पृथक् निर्देशः अपि न क्रियते। तर्हि को वा भेदः इति जायते जिज्ञासा -

माहेश्वरसूत्रेषु चत्वारः संयुक्तवर्णाः सन्ति। ते एव एच् इति प्रत्याहारेण निर्दिश्यन्ते। तेषु सन्धिः जातः इति भासते गुणावृद्ध्यादिसन्धीनां प्रत्यभिज्ञावशात्। वस्तुतः तत्र सन्धिरेव (शास्त्रीयः) नास्ति। तथा च महाभाष्ये एच इग्घ्रस्वादेशे इति सूत्रे एवं वार्तिकमस्ति - “**ऐचोश्चोत्तरभूयस्त्वात्**”[१] इति। तत्र प्रकरणमिदमस्ति - एच इग्घ्रस्वादेशे इति सूत्रस्य यानि प्रयोजनानि तानि अन्यथा साधयित्वा सूत्रं प्रत्याख्यायते। “**सिद्धमेङः सस्थानत्वात्**”[२] इति वार्तिकेन तालव्यस्य एकारस्य स्थाने ह्लस्वः इकार एव भवति तालव्यत्वात्। एवम् ओष्ठ्यस्य ओकारस्य ह्लस्वश्चेत् ओष्ठ्यः उकारः जायते।

अकारोऽपि अस्ति खलु एङोः स तर्हि कुतो न स्यात् इति प्रश्ने वार्तिके हेतुरुक्तः “**सस्थानत्त्वात्**” इति। अकारस्य तु स्थानसाम्यता नास्ति इति ज्ञायते। तस्मात् इदं सूत्रमेतदर्थं नापेक्षितम् इति प्रतिपादितम्। ततः परम् ऐचोः विषये भिन्ना व्यवस्था वर्तते इति दर्शनाय इदं वार्तिकम् आरभ्यते। अस्य अयमर्थः- ऐकारः औकारश्च एङपेक्षया विशिष्टौ। तयोः वर्णसंयोगः स्पष्टतरं भासते। तदेव उच्यते

---

[१] पतञ्जलिमहाभाष्यम् - १\१\४८, पृ.संख्या =४०७, संशोधकः श्री भार्गवशास्त्रि जोशी प्रकाशनम्-चौखम्भा २०१४

[६] वैयाकरणसिद्धान्तकौमुदी... दिल्ली १९६१

उत्तरभूयस्त्वम् इति। उत्तरभागः इकारोकारयोश्चेत् पूर्वभागः अकारस्य आकरस्य वा इति पुनः वक्तव्यं नास्ति। एङ् विषये सस्थानत्वहेतुना परिहारमुक्त्वा ऐचोः विषये पृथक् हेतुः दर्शितः वार्तिककारैः।

ततः अवगम्यते ऐचोः यः संयोगः स भासते। एङोः संयोगस्तु न भासते। यत्र भासः अस्ति तत्र उभयोः प्राप्तिः। अतः उत्तरभूयस्त्वरूपभिन्नहेतुना परिहारम् अवोचत् वररुचिः। तत्र वार्तिके बहु स्वरसं दृष्टान्तं च दर्शितवान्। ब्राह्मणग्रामः आनीयताम् इति कश्चित् राज्ञा आदिष्टः। सः एकं ग्रामं गच्छति यस्मिन् अधिकाः ब्राह्मणाः एव निवसन्ति। अन्ये केचन अवरपक्षेण वसन्त्येव। सर्वत्र हि पञ्चकारुकी भवति ग्रामे। प्रायः तादृशः एकोऽपि ग्रामः तेन न लभ्यते यत्र ब्राह्मणभिन्नाः केऽपि नैव सन्ति। तद्वत् ऐचोः जायमानः ह्रस्वः उत्तरभूयस्त्वात् इकारः उकारो वा भवति। न तु अकारः। ततश्च सूत्रस्य अपेक्षां विनापि तत् पूर्यन्ते इति कृत्वा तस्य सूत्रस्य दृष्टं प्रयोजनं नास्ति इति निश्चीयते। अदृष्टार्थं तत्सूत्रमपेक्षितमेव। इदमेव व्याकरणपरिभाषायां **प्रत्याख्यान**मिति उच्यते।

| | |
|---|---|
| **एकारः**<br>**ओकारः** | अनयोः वर्णायोः संयोगः **क्षीरोदकवत्**। पृथक्कृत्य यथा पयः जलं पुनः उपलब्धुं न शक्यते। तथा अत्र वर्णयोः संयोगः पृथक्कृत्य ज्ञातुं न शक्यते। |